Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

संस्कृत-

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)

वर्ष : १६ अङ्क : १८४

सप्टेम्बर - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### वयं नटाः, शिवः नटराजः

चम्पकस्य क्षुपात् पतितं म्लानं पुष्पं जीवति । छिन्नपक्षः आहतः पक्षी अपि जीवति । गतार्तवा पङ्कप्रिया महिषी जीवति । पञ्जरस्थः सिंहः अपि जीवति । पदार्थभूता काचित् विवशा गणिका जीवति । छात्राणां नितरां रुचिच्छेदकः कुण्ठितः प्राध्यापकः जीवति । भ्रष्टाचारलिप्तसकलगात्रः धृष्टः राजनेता जीवति । कलहप्रिया पत्नी जीवति । उदासीनः पतिः अपि जीवति । श्वशुरगृहे त्रासं सहमाना काचित् मुग्धा जीवति । स्वजनैः सर्वतः पीड्यमाना विधवा अपि जीवति । अस्मिन् संसारे कोटिशः जनाः जीवन्ति । परन्तु बहूनां जनानां जीवनेन सह कोऽपि सम्बन्धः एव नास्ति । ते केवलं जीवन्ति । जीवनं काचित् देवदत्ता दिव्या घटना वर्तते इति केचन मूर्च्छिताः न जानन्ति । मया अनेके जनाः अवलोकिताः । प्रजाभ्यः मतं कथं ग्रहणीयम् इति राजनेता सम्यक् जानाति । वणिजः यदा रूप्यकाणि गणयन्ति तदा तेषां 'कर्मसु कौशलम्' वयं प्रत्यक्षीकर्तुं शक्नुमः । शिक्षकः पाठनीयं पाठं कदाचित् विस्मरति, किन्तु वेतनस्य मङ्गलं दिवसं सदैव स्मरति । आक्षिप्तः मनुष्यः न्यायालये प्रत्येकं शब्दं विचिन्त्य वदति । तावत् अवधानं सः सामाजिकेषु व्यवहारेषु न करोति । यः पूर्णतः जागरितः अस्ति, सः प्रबुद्धः उच्यते । समाजे प्रबुद्धाः जनाः कति स्युः ।

कालः गच्छति वा न वा, वयं तु गमिष्यामः एव । एतं विषयं भर्तृहरिः सम्यक् ज्ञातवान् । सः एव वक्तुम् अर्हति यत् 'कालो न यातो वयमेव याताः ।' तथैव ननु, मनुष्यः जीवने किमपि न करिष्यति चेदपि जीर्णः भविष्यति एव । केवलं भोक्तुं पृथ्वीम् अवतीर्णाः मनुष्याः अपि वृद्धाः भवन्ति एव । परन्तु भेदः सामान्यः नास्ति । जीवनस्य तिस्रः गतयः भवन्ति – रोगः, भोगः, योगश्च । रोगी कष्टेन जीवनं यापयति । भोगी मूर्च्छया जीवनं नाशयति । योगी अवधानेन जीवनं भूषयति । यः जीवनं प्रति श्रद्धालुः विद्यते सः नास्तिकः सन् अपि धार्मिकः अस्ति । यतो हि सः जीवनधर्मं जानाति । वस्तुतः धर्मस्य सम्बन्धः जीवनेन सह वर्तते । यः जीवितुं जानाति सः धार्मिकः । जीवनधर्मं ज्ञातुं शास्त्राणाम् आवश्यकता नापि भवेत् । तदर्थं समाजे 'जङ्गमाः' देवालयाः अपि अनेके उपलभ्यन्ते । यथा हि दीर्घं दण्डं धृत्वा सूत्रस्य उपरि चलन्तं कञ्चित् नटं भवन्तः दृष्टवन्तः स्युः । तस्य हस्ते विद्यमानः दण्डः सन्तुलनस्य रक्षणे साहाय्यं करोति । सः दण्डः अर्थात् मनुष्यस्य विवेकः । विवेकेन जीवने समत्वं सिद्ध्यति । भगवद्गीता एतं विवेकं 'योगं' वदति ।

( अनुसन्धानम् ५ पृष्ठे... )

## मुद्रात्मकः ग्रन्थिः

जातककथा

ब्रह्मदत्तः यदा काशीराज्यं पालयति स्म तदा बोधिसत्त्वः कस्यचित् धनिकस्य कृषिकस्य गृहे जन्म प्राप्तवान् आसीत्। यथा यथा सः प्रवृद्धः तथा तथा तस्य कुटुम्बस्य सम्पत्तिः अपि प्रवृद्धा। बोधिसत्त्वस्य कश्चन अनुजः अपि आसीत्।

धनिकः कृषिकः यदा दिवं गतः तदा कृषिकेभ्यः धनादीनां सङ्ग्रहस्य दायित्वं ताभ्यां सोदराभ्याम् एव निर्वोढव्यम् अभवत्।

अथ कदाचित् करसङ्ग्रहाय तौ पार्श्वग्रामं गतवन्तौ। कृषिकाः देयानि धान्यानि, सहस्रं मुद्राः च दत्तवन्तः। तत् धनं धान्यानि च स्वीकृत्य तौ सहोदरौ काशीं प्रति प्रस्थितवन्तौ।

मार्गे काचित् नदी प्राप्ता। नाविकस्य आगमने विलम्बः आसीत्। अतः तौ सहोदरौ आत्मना आनीतं पाथेयग्रन्थिम् उद्घाट्य भोजनं कृतवन्तौ।

बोधिसत्त्वः स्वकीयायाः प्रवृत्तेः अनुगुणं भोजनस्य कञ्चन भागं नद्यै समर्पितवान्।

स च आहारभागः तस्यां नद्यां निवसता जलभूतेन प्राप्तः। तस्य सेवनेन सः जलभूतः दिव्यशक्तिशाली जातः। एतस्मात् सः अवगतवान् यत् आहारं नद्यै समर्पितवान् जनः कश्चन महात्मा एव इति।

भोजनस्य समाप्तेः अनन्तरं बोधिसत्त्वः स्वस्य वस्त्रं नदीतीरे सिकतानाम् उपरि प्रसार्य शयनं कृतवान्। तस्य अनुजः ईर्ष्यालुः आसीत्। सः अचिन्तयत् यत् अग्रजस्य भागः अपि मया एव वशीकरणीयः इति। अतः सः धनग्रन्थिसदृशम् एव ग्रन्थिं सज्जीकृत्य तस्य अन्तः बहून् शिलाखण्डान् स्थापितवान्। तदुभयम् अपि स्वस्य वस्त्रस्य अन्तः गोपितवान् सः।

किञ्चिदनन्तरं नाविकः आगतवान्। बोधिसत्त्वः निद्रां समाप्य उत्थितवान्। उभौ अपि नौकाम् आरूढवन्तौ। यदा नौका नद्याः मध्यभागम् आगता तदा अनुजः उपायेन शिलाखण्डग्रन्थिं नद्यां पातितवान्। ततः सः कृत्रिमं खेदम् अभिनयन् उच्चैः आक्रन्दनं कृतवान् – "सहोदर! हन्त! धनग्रन्थिः प्रमादवशात् नद्यां पतितः" इति।

तदा अनुजं सान्त्वयन् बोधिसत्त्वः अवदत् – "अनुज! सा सम्पत्तिः प्रायः अस्माकं न आसीत्। अतः सा नद्यां पतिता। प्रवृत्तस्य विषये अधिकचिन्तया न किमपि प्रयोजनम्। अलं विषादेन" इति।

बोधिसत्त्वेन नद्यै अर्पितम् आहारं सेवितवान् जलभूतः दिव्यशक्तेः कारणतः नद्यां जातं धनग्रन्थेः पतनं झटिति ज्ञातवान्। अनुजस्य दुष्टचिन्तनम् अपि अवगतं तेन। सः झटिति कञ्चित् महामीनम् आज्ञापितवान् – 'वेगेन गत्वा तं धनग्रन्थिं गिलतु' इति। महामीनः तथैव अकरोत्। सः महामीनः कुत्रापि पलायनं यथा न कुर्यात् तथा तदुपरि विशेषदृष्टिं स्थापितवान् आसीत् जलभूतः।

बोधिसत्त्वः तदनुजः च काशीं प्रत्यागतवन्तौ। गृहं गतः अनुजः प्रकोष्ठे उपविश्य ग्रन्थिम् उद्घाटितवान्। तत्र

शिलाखण्डाः दृष्टाः तेन। तदा सः आत्मना कृतं दोषं ज्ञातवान्। सः नद्यां धनग्रन्थिम् एव पातितवान् आसीत्, न तु शिलाखण्डग्रन्थिम्। प्रवृत्तं स्मरन् पश्चात्तापं खेदं चिन्तां च अनुभवन् सः शय्याम् आश्रितवान्।

कदाचित् केचन धीवराः मीनग्रहणाय नद्यां जालं प्रसारितवन्तः। तदा जलभूतः उपायेन तं महामीनम् अपि तस्मिन् जाले अपातयत्। तं गृहीत्वा धीवराः तस्य विक्रयणाय विपणीं गतवन्तः। जनैः यदा मूल्यं पृष्टं तदा ते धीवराः उक्तवन्तः – ''एतस्य मत्स्यस्य मूल्यं सहस्रं सुवर्णमुद्राः'' इति।

तत् अधिकं मूल्यं श्रुत्वा क्रेतारः हसन्तः अचिन्तयन् – 'एते धीवराः नितरां मूर्खाः' इति। तदनन्तरं धीवराः बोधिसत्त्वस्य गृहं गत्वा उक्तवन्तः – ''वयं मीनस्य विक्रयणाय अत्र आगताः'' इति।

''एतस्य मत्स्यस्य किं मूल्यम्?'' इति अपृच्छत् बोधिसत्त्वः।

''भवते वयम् एकया मुद्रया एतं विक्रेतुम् इच्छामः'' इति अवदन् धीवराः।

''भवतां वचनं विलक्षणम् इव भाति खलु?'' 'भवते वयम् एकया मुद्रया एतं विक्रेतुम् इच्छामः' इति वदन्ति भवन्तः। एवं तर्हि अन्येभ्यः एषः केन मूल्येन विक्रेतुम् इष्यते भवद्भिः?'' इति आश्चर्येण अपृच्छत् बोधिसत्त्वः।

''अन्येभ्यः तु वयं सहस्रं सुवर्णमुद्राः प्राप्तुम् इच्छामः'' इति अवदन् धीवराः।

बोधिसत्त्वः आश्चर्यम् अनुभवन् एकां सुवर्णमुद्रां दत्त्वा तं मीनं क्रीतवान्।

बोधिसत्त्वः तत्पत्नी च यदा तं मीनं कर्तितवन्तौ तदा तस्य मीनस्य उदरे सहस्रसुवर्णमुद्रात्मकः धनग्रन्थिः प्राप्तः। 'एषः ग्रन्थिः ममैव' इति अवगतवान् बोधिसत्त्वः दर्शनमात्रेणैव।

''एषः धनग्रन्थिः अस्माकम् एव'' इति पत्नीम् उक्त्वा बोधिसत्त्वः पूर्वं नदीतीरे प्रवृत्तं सर्वं तां निवेदितवान्।

ततः सः पत्नीं पुनरपि अवदत् – ''एते धीवराः दिव्यज्ञानवन्तः इति भाति। ते जानन्ति स्म यत् मत्स्यस्य उदरे धनग्रन्थिः अस्ति इति। अतः तस्य तावत् मूल्यं वदन्ति स्म ते। स च ग्रन्थिः ममैव इत्यपि ते जानन्ति स्म। अतः एकया एव मुद्रया मीनं मह्यं विक्रेतुम् ऐच्छन् ते। या एका मुद्रा तैः प्रार्थिता सा तेषां पारिश्रमिकम् आसीत् प्रायः'' इति।

'एतेषु धीवरेषु दिव्यज्ञानं कथं वा भवितुम् अर्हति?' इति चिन्तयन् महत् आश्चर्यम् अनुभूतवान् बोधिसत्त्वः।

तदा काचित् अशरीरवाणी तेन श्रुता – ''महानुभाव! अहं नद्यां निवसन् कश्चन जलभूतः अस्मि। कदाचित् भवान् नद्यै खाद्यपदार्थान् अर्पितवान्। ते मया सेविताः। तस्मात् मया दिव्यशक्तिः सम्प्राप्ता। नद्यां पतन् धनग्रन्थिः मया दिव्यशक्त्या दृष्टः। अहं कञ्चित् महामीनं तस्य गिलनाय प्रेरितवान्। सः मीनः धीवरैः गृहीतः। तान् बोधयित्वा अहं भवत्समीपं प्रेषितवान्। एवं मया भवतः ऋणात् मुक्तिः प्राप्ता। भवतः अनुजः तु महादुष्टः। सः भवन्तं वञ्चयितुं प्रयत्नं कृतवान्। अतः तस्मै एतस्य धनराशेः न कोऽपि भागः सर्वथा दातव्यः भवता'' इति। जलभूतस्य उपकारं ज्ञात्वा तस्य सद्व्यवहारं च स्मृत्वा बोधिसत्त्वः महान्तं सन्तोषम् अनुभूतवान्। किन्तु अनुजस्य विषये जलभूतेन यत् उक्तं तत् न पालितवान् सः। भ्रातृन्यायस्य अनुगुणम् अनुजाय पञ्चशतं मुद्राः यच्छन् सः अनुपमं भ्रातृप्रेम प्रकटितवान्।

## देव्याः महिमा

रामदुर्गनामके ग्रामे ये कृषिकाः वसन्ति ते सर्वे अतिसामान्याः । तेषु अनक्षरज्ञाः एव अधिकाः । तेषां गृहाणि प्रायः कुटीरसदृशानि, तृणैः आच्छन्नानि च । ग्रामरक्षकग्रामप्रमुखादीनां केषाञ्चित् एव गृहाणि मृच्छदेन आच्छन्नानि सन्ति। ग्रामस्य मध्यभागे देव्याः मन्दिरम् अस्ति।

ग्रामस्य कृषिकेषु ऐक्यभावस्य अभावः। लघुं विषयम् अधिकृत्य अपि कलहं कुर्वन्ति स्म ते।

औष्ण्यकाले कदाचित् ग्रामस्थेषु कुटीरेषु अग्निस्पर्शः जातः । अग्निः इतरत्र अपि प्रासरत्। एतत् दृष्ट्वा ग्रामीणाः उच्चै आक्रन्दनं कुर्वन्तः अन्यान् जागरूकतावचनानि वदन्तः कासारतः जलम् आनेतुम् उद्युक्ताः जाताः । अन्येषु गृहेषु अपि अग्निः यथा न प्रसरेत् तथा प्रयासः अपि तैः कृतः।

अग्निं पूर्णतया निवार्य यदा ते गृहं प्रत्यागच्छन्तः आसन् तदा मन्दिरस्य अर्चकः तान् उक्तवान् 'क्षणं तिष्ठन्तु' इति। सः तान् पुनः अवदत् – ''अस्माकं देवी स्वस्य महिमानं दर्शितवती। अस्मान् जागरय्य रक्षितवती अपि'' इति।

अर्चकेण किम् उच्यमानम् अस्ति इति ग्रामीणैः न अवगतम्। तदा अर्चकः पुनः अवदत् – ''अस्माकं देवी ज्वालानां द्वारा प्रकाशं प्रसारितवती। अतः वयम् अन्धकारे अपि कार्यं कर्तुं शक्तवन्तः। अन्यच्च, अग्निनिवारणप्रयासे अस्मासु ऐक्यम् आसीत्। एतत् सर्वदा भवतु इति देव्याः आशयः अस्ति'' इति।

## प्रश्नाः उत्तराणि च

**डॉ. वासुदेवः वि. पाठकः 'वागर्थः'**

किमस्ति परमं तत्त्वं ? वाक्पटुश्च करोति किम् ?
सत्कार्यैश्च प्रसन्नः कः ? सत्यं, वदति सज्जनः ॥
प्रदानं पावनं केषाम् ? विश्वस्यं किं सतां मतम् ?
वाञ्छत्येव सुकन्या कम् ? वेदानां वचनं वरम् ॥
कश्चाधीशश्च देवानाम् ? कीदृशश्च शिवस्स्मृतः ?
कदा कल्याणदा माता ? सुरेशः शिवदः सदा ॥
कं राधयति वै राधा ? कथं राध्यश्च माधवः ?
कृपामाप्तुं च किं कार्यम् ? माधवं मनसा भजेत् ॥
किं कृते दुःखमेव स्यात् ? पापस्य किं भवत्यहो ?
पितरौ नः कदा पूज्यौ ? प्रमादे पतनं सदा ॥
रामस्य मारुतिः कश्च ? पत्नी कस्यास्ति जानकी ?
अञ्जनीतनयः कश्च ? दासो रामस्य मारुतिः ॥
जीवने संस्कृतः कश्च ? शोभते कश्च धार्मिकः ?
कीदृशश्च सतां मार्गः ? कुलीनः संस्कृतः शुभः ॥
जीवनं किं निमित्तं स्यात् ? यज्ञं कारयतीति कः ?
सद्गुरुश्च कदा सेव्यः ? परार्थं याज्ञिकः सदा ॥

**अत्र, चतुर्थे चरणे उत्तराणि । अन्येषु च प्रश्नाः ।**

**भावनाञ्जलिः**

सुचिरां शान्तिमाप्नुयुः ।
महामहोपाध्यायाः पण्डितप्रवराः सुकवयः
आचार्याः रेवाप्रसादद्विवेदीवर्याः

**रे**मे यो विदुषां विश्वे
**वा**चस्पतिदिवात्मभूः ।
**प्र**ज्ञाप्रसाददाता च
**सा**रस्वतः पदे पदे ॥
**द**क्षः साहित्यवैविध्ये
**द्वि**वेदीवंशभूषणः ।
**वे**दविज्ञानसुज्ञाय
**दी**यते भावनाञ्जलिः ॥

# मासवार्ता

## आयोजितानि व्याख्यानानि






संस्कृतरसिकाः संस्कृतसाहित्यस्य परिचयं प्राप्नुयुः इति विचार्य एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनम् अभवत्। कार्यक्रमेऽस्मिन् अगस्तमासस्य ७ दिनाङ्के विद्वान् बी.वि.रामप्रियः 'न्यायशास्त्र का परिचय' इति विषये, अगस्तमासस्य १४ दिनाङ्के डॉ. रीता त्रिवेदी 'अथर्ववेद में समाजलक्षी राजधर्म' इति विषये, अगस्तमासस्य २१ दिनाङ्के डॉ. जानकीशरणः आचार्यः 'वेदान्त दर्शन का परिचय' इति विषये, अगस्तमासस्य २८ दिनाङ्के श्री अर्जुनः सामलः 'व्याकरण अध्ययन के प्रयोजन (पस्पशाह्निक के सन्दर्भ में)' इति विषये च मनोहरं व्याख्यानं प्रायच्छन्। व्याख्यानानि श्रुत्वा संस्कृतरसिकाः सन्तुष्टाः आसन्।

## सम्पन्नः 'Diploma in Sanskrit Teaching' अभ्यासक्रमः

एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य २०२०-२१ तमवर्षस्य 'Diploma in Sanskrit Teaching' इति अभ्यासक्रमः अगस्तमासस्य २६ दिनाङ्के सम्पन्नः । संस्कृतमाध्यमेन संस्कृतं पाठयितुं समर्थानां शिक्षकानां प्रशिक्षणाय अयम् अभ्यासक्रमः सञ्चाल्यते। एतम् अभ्यासक्रमं प्रति विभिन्नेभ्यः क्षेत्रेभ्यः आगताः शिक्षकाः समाजे संस्कृतभाषां पाठयितुम् उत्सुकाः वर्तन्ते। अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृतविश्वविद्यालयमान्यः वर्तते।

## वयं नटाः, शिवः नटराजः

परन्तु तदर्थं विवेकपुराणं ज्ञातव्यम्! किं कर्तव्यं किञ्च न कर्तव्यम् इति ज्ञातव्यम्। कः विश्रामः कश्च प्रमादः इति ज्ञातव्यम्। त्वरासम्भ्रमयोः भेदः ज्ञातव्यः। द्राढ्यं जाड्यं च ज्ञातव्यम्। आग्रहस्य हठस्य च अन्तरं ज्ञातव्यम्। स्वतन्त्रता स्वेच्छाचारः न भवेत् इति चिन्तनीयम्। नम्रता उत्तमः गुणः, परन्तु क्लैब्यं दुर्गुणः एव। शौर्यं गुणः, किन्तु क्रूरता दुर्गुणः। स्वाभिमानः हिताय, किन्तु अहङ्कारः नाशाय। तात्पर्यं तु एकमेव यत् यः मनुष्यः तत्त्वतः जीवितुम् इच्छति सः विवेकदण्डेन जीवनसूत्रे सुतरां चलति। अस्मिन् अर्थे वयं मनुष्याः नटाः स्मः, भगवान् शिवः नटराजः अस्ति।

## कृपया हसन्तु

**पुत्रः - (पितरम् उद्दिश्य) भोः पितः ! किम् अहं दूरदर्शनं पश्यानि ?**

**पिता - आम्, पश्यतु । किन्तु आरम्भं न करोतु ।**

★ ★ ★ ★ ★

**शिक्षकः - (रमणम् उद्दिश्य) भोः रमण ! त्वया गृहकार्यं किमर्थं न कृतम् ?**

**रमणः - महोदय ! अहं तु छात्रावासे वसामि अतः... ।**

★ ★ ★ ★ ★

**पत्नी - (पतिम् उद्दिश्य) भोः ! वदतु, अद्य भोजनं कथम् आसीत् ?**

**पतिः - भोः प्रिये, त्वं किमर्थं कलहस्य अवसरम् इच्छसि ।**

★ ★ ★ ★ ★

**प्रथमः भिक्षुकः - (द्वितीयं भिक्षुकं प्रति) सः जनः दीर्घकालात् भवन्तं किं पृच्छन् आसीत् ?**

**द्वितीयः भिक्षुकः -'भवान् प्रतिदिनं कियत् धनम् अर्जयन् अस्ति ।' इति सः पृच्छन् आसीत् ।**

**प्रथमः भिक्षुकः - त्वया किं कथितम् ?**

**द्वितीयः भिक्षुकः - अहं मौनं स्थितवान् । किमपि न उक्तवान् ।**

**प्रथमः भिक्षुकः - किमर्थम् ?**

**द्वितीयः भिक्षुकः - 'सः आयकराधिकारी अस्ति' इति अहं चिन्तितवान् ।**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**उत्सवे व्यसने चैव दुर्भिक्षे शत्रुनिग्रहे ।**
**राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥**

**तात्पर्यम्** – अस्मिन् सुभाषिते अस्माकं वस्तुतः बान्धवः कः इति निरूपितम् अस्ति । उत्सवे व्यसने दुर्भिक्षे शत्रुनिग्रहे राजद्वारे श्मशाने चेति सर्वेषु अपि स्थानेषु अस्माभिः समं यः तिष्ठति सः बान्धवः भवति । अर्थात् अस्माकं सुखे यथा सहभागिनः तद्वत् कष्टे दुःखे अपि सहभागिनः भवन्ति ।

**उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।**
**शूरं कृतज्ञं दृढसौहृदं च सिद्धः स्वयं गच्छति वासहेतोः ॥**

**तात्पर्यम्** – उत्साहशीलम्, अविलम्बेन कार्यं कुर्वन्तं, कार्यपद्धतेः ज्ञातारं, दुरभ्यासेषु अनासक्तं, शूरं, कृतज्ञं, स्नेहस्वभावयुतं च जनं कार्यसिद्धिः स्वयम् आश्रयति ।

**उदये सविता रक्तः रक्तश्चास्तमने तथा ।**
**सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥**

**तात्पर्यम्** – सूर्योदयकाले सूर्यास्तकाले च सूर्यः रक्तवर्णीयः एव यथा भवति तथा सम्पत्तौ विपत्तौ च महात्मनः एकेनैव रूपेण भवन्ति । उभयथा अपि समत्वं परिपालयन्ति महात्मनः इत्यर्थः ।

## ज्ञानसरिता

**श्यामः पटेलः**

**अनिलचुल्लिका** – भोजनं पक्तुम् अग्नेः आवश्यकता भवति । तदर्थं प्राचीनकालादेव काष्ठानि आनीय चुल्लिकायां प्रज्वाल्य भोजनं निर्मामः वयम् । अनन्तरं तानि इन्धनानि काष्ठानि जलेन शमयित्वा कृष्णाङ्गारान् सम्प्राप्य तेषां प्रयोगम् अङ्गारधान्या भोजनं पक्तुं कुर्मः । एतस्मिन् क्रमे ख्रिस्ताब्दस्य १८तमे शतके पाकानिलेषु बहव्यः गवेषणाः सञ्जाताः । कैश्चित् वैज्ञानिकैः तदा कृत्रिम–ज्वलनशील–वायोः निर्माणस्य पद्धतिः अपि अन्वेषिता आसीत् । अङ्गारान् काष्ठानि तैलं च तादृश्यां मूलकारिकायां ज्वालयन्ति स्म यत्र प्राणवायुः न्यूनः भवति । येन ज्वलनशीलवायुः सम्भवति । तं वायुं नलिकया दूरं नीत्वा नलिकायाः अन्तभागे ज्वालयितुं शक्यम् आसीत् । फ्रान्सदेशस्य फिलिपलेबीन नामाख्यः इङ्ग्लेण्डदेशस्य विलियम मर्डोकेनामधेयः च वैज्ञानिकौ बहून् प्रयोगान् कृतवन्तौ । प्रयोगाः सफलाः अपि जाताः । अनेन प्रकारेण ख्रिस्ताब्दस्य १८१२ तमे वर्षे पाकानिलस्य अनिलचुल्लिकायाश्च आरम्भः जातः । इङ्ग्लेण्डदेशस्य लण्डननगरे वीथीदीपकलिकासु पाकानिलेन एव दीपाः ज्वलन्ति स्म । ख्रिस्ताब्दस्य १८५० तमस्य वर्षस्य समीपे 'नेप्था' 'व्हाइटगेस–पेराफिन' इत्यादीनां नामाख्यानां ज्वलनशीलवस्तूनां पल्वलयुक्ताः अनिलचुल्लिकाः निर्मिताः । ख्रिस्ताब्दस्य १८२६ तमे वर्षे जेम्सशार्प नामाख्यः वैज्ञानिकः भिन्नप्रकारस्य दाहकस्य प्रयोगम् अनिलचुल्लिकायां कृतवान् किन्तु तदा पाकानिलं नलिकामाध्यमेन दूरपर्यन्तं नेतव्यं कठिनम् आसीत् । अनन्तरं ख्रिस्ताब्दस्य १८८५ तमे वर्षे वैज्ञानिकः रोबर्टबन्सेनः 'बन्सेनबर्नर' नामकं दाहकम् अन्वेषितवान् । एतेन बन्सेन–दाहकेन 'पेट्रोलियम' इत्यस्य प्रयोगः पाकानिलत्वेन आरब्धः ।

अनिलचुल्लिका – gas stove, चुल्लिका – stove, अङ्गारधानी – coal stove, पाकानिलः – cooking gas, वीथीदीपकलिका – street light, पल्वलम् – small storage tank, दाहकः – burner, मूलकारिका – furnace

## शब्दमञ्जूषा

| | |
|---|---|
| **पदम्** | post |
| **पत्रवाहकः** | postman |
| **पत्रालयाध्यक्षः** | postmaster |
| **कुम्भकारः** | potter |
| **चूर्णकम्** | powder |
| **शिक्षा** | precept |
| **आचार्यः** | precepter |
| **मुद्रणालयः** | press |
| **प्रधानाचार्यः** | principal |
| **सिद्धान्तः** | principle |
| **समस्या** | problem |
| **घोषणा** | proclamation |
| **व्यवसायः** | profession |
| **सन्ततिः** | progeny |
| **सम्पत्तिः** | property |

## किं भवन्तः जानन्ति ?

**१ ) भगवान् महावीरः कस्यां तिथौ निर्वाणं प्राप्तवान् ?**
(क) वैशाखशुक्लतृतीयायाम् (ख) चैत्रशुक्लतृतीयायाम्
(ग) कार्तिकामावस्यायाम् (घ) आश्विनकृष्णनवम्याम्

**२ ) जैनतीर्थंकरस्य ऋषभदेवस्य जन्मतिथिः का वर्तते ?**
(क) चैत्रशुक्लाष्टमी (ख) वैशाखकृष्णतृतीया
(ग) चैत्रकृष्णाष्टमी (घ) वैशाखकृष्णचतुर्थी

**३ ) गुरूगोविन्दसिंहस्य जन्म कदा जातम् आसीत् ?**
(क) आश्विनपूर्णिमायाम् (ख) पोषशुक्लसप्तम्याम्
(ग) आश्विनामावस्यायाम् (घ) कार्तिकपूर्णिमायाम्

**४ ) 'लोहड़ी' पर्व कस्यां तिथौ भवति ?**
(क) माघपूर्णिमायाम् (ख) माघामावस्यायाम्
(ग) माघकृष्णप्रथमायाम् (घ) माघशुक्लतृतीयायाम्

**५ ) वसन्तपञ्चमीपर्व कस्यां तिथौ आचर्यते ?**
(क) चैत्रशुक्लपञ्चम्याम् (ख) फाल्गुनशुक्लपञ्चम्याम्
(ग) माघकृष्णपञ्चम्याम् (घ) माघशुक्लपञ्चम्याम्

उत्तराणि – (१) ग (२) क (३) ख (४) ग (५) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## शिवमहिम्नः स्तोत्रम्

( श्लोकोच्चारणं भावानुवादश्च )



**Date :** 7/9/21 to 30/9/21
**Day :** Tue-Thur
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 2000/-

**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા માંગો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા માંગો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા માંગો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા માંગો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજીત

## "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી** માન્ય કોર્ષમાં

ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતાઃ**

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડો. મિહિર ઉપાધ્યાય **9824616237**

संस्कृत-**साम्प्रतम्**

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | | |
|---|---|---|
| वार्षिकं | रू | – 100 |
| द्वैवार्षिकं | रू | – 175 |
| त्रैवार्षिकं | रू | – 250 |
| अङ्कमूल्यं | रू | – 10 |

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006